ISSN 2278-4004 UGC CARE List Journal

# प्राच्या
# PRĀCYĀ

*A Peer Reviewed (Refereed) Journal on Sanskrit & Related Studies*

**Volume - XV**
**(PART - II)**

## ĀYURVEDAVIŚEṢĀṀKAḤ
## आयुर्वेदविशेषांकः

धन्योऽयं भारतो देशः धन्येयं सुरभारती।
उपासकाः वयं यत्र धन्या अहो परम्परा।।

**DEPTARTMENT OF SANSKRIT**
**MDK Girls' College, Dibrugarh, Assam**
**2023**

# Fever in the Carakasaṁhitā – An Analysis

– Dr. Ratul Bujarbarua

*Sanskrit has continued to be the most important vehicle for intellectual discourse throughout the centuries. It can be said that the Vedas and Upaniṣads stand as basic source of oriental knowledge system. The six Vedāṅgas, Dharmaśāstras, Purāṇas, works on ancient Indian medical science etc. contributed much in the development of Indian knowledge system. Present day world is looking towards India with great hope perhaps for its great intellectual property reflected through Sanskrit tradition. Among the ancient texts on Āyurveda, the Carakasaṁhitā is considered to be the most authoritative since it represents the fundamental principles oj medicine. The methods of treatment underlined in the Carakasaṁhitā are significant for maintaining sound health and prevention of diseases. Among the eight Sthānas or sections of the Carakasaṁhitā, the Nidānasthāna deals with the causes of diseases, the origination and development of diseases and diagnosis of diseases. The first Chapter of the Nidānasthāna deals with the various types of fever and diagnosis which was perhaps existed during the time of the Carakasaṁhitā. It considers Jvara as the most powerful disease since it effects body, mind and senses. There was a belief at that time that the gods were responsible for causing fever and they can only provide remedies. The paper highlights the concepts of Jvara in the light of Carakasaṁhitā which are important in determining the cause of fever and its proper management.*

***Key words:*** *Carakasaṁhitā, Nidānasthāna, Jvara, Āyurveda*

अस्मिन् भूमण्डले इतरदेशेभ्यः पूर्वमेव भारतवर्षे चिकित्साशास्त्रमासीत् इति इतिहासविदां मतम्। अतिप्राचीनेषु वेदेष्वपि समुपलभ्यन्ते नैकाश्चिकित्साशास्त्रविषयाः। प्राचीनभारतीयचिकित्सापद्धतीनां मूलोत्सः प्रायेण वेदेषु मुख्यरूपेण अथर्ववेदे स्थले स्थले दरीदृश्यते। तत्र औषधिचिकित्सा–शल्यचिकित्सा–मनोवैज्ञानिकचिकित्सा–जलचिकित्सा–अग्निचिकित्सा–प्राकृतिकचिकित्सानामपि उल्लेखः प्राप्यते। चरकसंहिता–सुश्रुतसंहिता–अष्टांगहृदय–भावप्रकाशादयः प्रसिद्धाः आयुर्वेदग्रन्थाः प्राचीनभारतवर्षे उपलभ्यन्ते। चरकसमयेऽपि भारतवर्षे विविधान्यायुर्वेदतन्त्राणि प्रचलितान्यासन्, यदुक्तं चरकेन विमानस्थाने–'विविधानि हि शास्त्राणि भिषजां प्रचरन्ति लोके'[१]। आयुर्वेदाचार्यैः ज्वरः प्रधानव्याधिरूपेण स्वीकृतोऽस्ति। यतो हि ज्वरः प्राणिमात्रेषु जन्मतः मृत्युं यावत् कस्मिञ्चित् काले अवश्यमुत्पद्यते तस्मात् तैः ज्वररूपव्याधिः मुख्यव्याधित्वेन अङ्गीकृतः। व्याधिरयं स्वतन्त्रोऽस्ति तथा अन्यव्याधीनां लक्षणरूपेणापि प्रकटीभवितुं शक्नोति। व्याधिरयं शरीरेषु मनस्सु उभयत्र समानरीत्या प्रभान्वितं करोति–

तस्य प्रकृतिरूद्दिष्टा दोषाः शारीरमानसाः।
देहिनं न हि निर्दोषं ज्वरः समुपसेवते॥[२]

आधुनिकचिकित्साविज्ञाने ज्वररूपव्याधिरयं Fever, Pyrexia वा इति नाम्ना ज्ञायते। प्राचीनभारतीयचिकित्साविज्ञाने चरकसंहितायाः स्थानमतुलनीयम्। अतः चरकसंहितायां ज्वरसम्बद्धा चर्चा केनरूपेण वाऽस्ति तद्विषये विश्लेषणं क्रियते।

चरकसंहितायाः द्वितीयपरिच्छेदोऽस्ति निदानस्थानम्। हेतुर्निमित्तमायतनकर्ताकारण-प्रत्ययसमुत्थानादयः निदानार्थकाः शब्दाः भवन्ति। चरकसंहितायां निदानस्थाने अष्टविधानां रोगाणां निदानविषयकं सविस्तरं वर्णनं समुपलभ्यते। तद्यथा- ज्वरनिदानम्, रक्तपित्तनिदानम्, गुल्मनिदानम्, प्रमेहनिदानम्, कुष्ठनिदानम्, शोषनिदानम्, उन्मादनिदानम्, अपस्मारनिदानञ्चेति। ज्वरनिदानं निदानस्थानस्य प्रथमपरिच्छेदे इत्थं वर्णितम्-

''अथातो ज्वरनिदानं व्याख्यास्यामः।

इति ह स्माह भगवानात्रेय'॥[३]

निदानस्थानस्य प्रथमेऽध्याये भगवानात्रेयः ज्वरस्य निदानस्य वर्णनां करोति- ''इह खलु ज्वर एवादौ विकाराणामुपदिश्यते तत्प्रथमत्याच्छारीराणाम्''[४]। अर्थात् सर्वरोगाग्रजः, रोगेषु प्रधानः प्राणिनां शत्रुः, देहेन्द्रियमनोत्तापादिकारणभूतं ज्वरनामकं रोगं देवारोपितत्वात् मनुष्यः सोढुं शक्नोति। ज्वर इत्यभिधेयः रोगः स्वरूपार्थतः विभिन्नरोगानाम् उपलक्षणरूपेण प्रतिभाति। अतः कोऽपि जनः यदि बहुदिनपर्यन्तं ज्वररोगेण पीडितो भवति तर्हि चिकित्सकस्य निदानानुसारं यथायथ चिकित्सा कर्त्तव्या।

ज्वरस्य दैवायत्तं दर्शयितुमाह - 'ज्वरस्तु खलु महेश्वरकोपप्रभवः'[५]। अर्थात् ज्वरस्तु रौद्रस्य महादेवस्य वा कोपात् जायते। उक्तं हि हरिवंशे-

ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।

भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥[६]

अथर्ववेदे ज्वरमेव असुररूपेण कल्पयित्वा तस्य असुरस्य नाम 'तक्मन' इत्येवं कथ्यते। तक्मनमधिकृत्य नैका मन्त्राः तत्र उपलभ्यन्ते। ज्वरस्य नाशकरूपेण कुष्ठाभिधेयस्य वृक्षविशेषस्य उल्लेखः प्राप्यते-

यो गिरिषवजायथा वीरुधां वलवत्तमः।

कुष्ठेहि तक्मनाशन तक्मानं नाशयन्नितः॥[७]

यक्ष्मादिरोगाः प्राचीनभारतवर्षे दैवापद्रूपेण स्वीक्रियन्ते स्म। तदा जनाः विश्वसन्ति यत् रोगाः तदा एव उत्पद्यन्ते यदा देवाः कुपिताः भवन्ति अथवा जनैः पापाचरणं क्रियते। एवं समस्तानां रोगाणां निवारणमपि दैवकृपया एव भवति। अतः देवानां प्रीत्यर्थं नैका उपायाः शास्त्रेषु वर्णिताः सन्ति। अथर्ववेदस्य रक्षाकाण्डे दैवापदः निरोधोपायरूपेण वरणमणेः वर्णनं प्राप्यते। तत्र प्राप्यते यत् अयं वरणमणिः दुःस्वप्नस्य विनाशं करोति। स्वरूपार्थतः दृश्यते यत् यदि कोऽपि जनः स्वप्नं पश्यति तर्हि स्वप्नानुसारेण तादृशस्य जनस्य मनसि सुखानुभूतिः दुःखानुभूतिः वा जायते। अथर्ववेदे दुःस्वप्नस्य विनाशाय वरणमणिधारणस्य यदुल्लेखः प्राप्यते स वरणमणिः दुःस्वप्नं विनाशयितुं समर्थो भवति वा न भवति तत सम्यकतया वक्तुं न शक्यते। परन्तु दुःस्वप्नवशात् तादृशस्य जनस्य मनसि यः शारीरिक-मानसिकविकारो जायते तद् प्रशमयितुम् अस्य वरणमणेः अवश्यमेव धारणं कर्त्तुं शक्यते। कदाचित् यदा कश्चन व्यक्तिविशेषः मार्गेण गच्छन् केषांश्चित् पक्षिविशेषाणां अपशकुनयुक्तशब्दं श्रृणोति तत्तु अनिष्टसूचकं अपशकुनञ्च भवति। तदानीं एषः व्यक्तिविशेषः कश्चित् विशिष्टमणिं धारयति चेत् तस्मात् अनिष्टात् रक्षितो भवतीति अथर्ववेदवचनम्-

स्वप्नं सुप्त्वा यदि पश्यासि पापं मृगः सृतिं यति धावादजुष्टाम्।

परिक्षवाच्छकुनैः पापवादादयं मणिर्बरणो वारयिष्यते॥[८]

चरकेण चिकित्सायाः भेदत्रयं स्वीकृतम्- दैवव्यपाश्रया चिकित्सा, सत्वावजयचिकित्सा युक्तिव्यपाश्रया चिकित्सा च-

प्रशाम्यत्यौषधैः पूर्वो दैवयुक्तिव्यपाश्रयैः।[९]

त्रिविधमौषधमिति दैवव्यपाश्रयं युक्तिव्यपाश्रयं सच्चावजयश्च॥[१०]

रोगग्रस्तजनस्य भयनिवारणाय आत्मविश्वासवर्धनाय वा दैवव्यपाश्रयचिकित्सा विहिताऽस्ति। अस्यां चिकित्सायां दैवशक्तिं प्रति विश्वासपोषणाय तथा ईश्वरं सन्तुष्टिविधानाय उपायाः सन्निविष्टाः भवन्ति। वस्तुतस्तु जनाः यदा रोगाक्रान्ताः भवन्ति तदा तस्य प्रभावः न केवलं शरीरे दृश्यते मनसि अपि दृश्यते। रोगपीडिताः जनाः यदि मनसा सबलाः न भवन्ति तर्हि जीवनधारणं कठिनमेव भवति। निरन्तरं तेषां मनसि जीवनमधिकृत्य दुःचिन्तायाः उन्मेषो भवति। अस्यां परिस्थित्यां तादृशानां जनानां संशयनिवारणाय आत्मविश्वासवर्धनाय च शास्त्रे विहिता दैवव्यपाश्रयचिकित्सा अवश्यमेव करणीया। अनेन जनानां रोगाः सम्पूर्णरूपेण निर्मूलाः भवन्तु वा न परन्तु एतद् स्वीकरणीयं यत् एतेन शारीरिकमानसिकविकाराः किञ्चिद् लाघवाः भवन्ति। अतः भारतवर्षस्य विविधप्रान्तेषु जनाः मन्त्रोच्चारणेन ज्वरं प्रशमयितुं प्रयतन्ते। रोगस्य प्रशमनाय ते मणि-मुकुतादिधारणं कुर्वन्ति पशुबलिदानेषु च विश्वसन्ति। अतः एषा चिकित्सा प्राचीनभारतवर्षे ईश्वरीयचिकित्सारूपेण प्रसिद्धाऽस्ति। शारीरिकमानसिकविकारयोः प्रशमनाय एषा चिकित्सा प्रचलिताऽस्ति। अस्यां चिकित्सायां मन्त्र-औषधि-मणिधारण-पशुबलिदान-होम-प्रायश्चित्त-यात्रागमन-उपवासादय अन्तर्भुक्ताः सन्ति-

दैवव्यपाश्रयमन्त्रौषधिमणिमङ्गलबल्युपहाराहोमनियमप्रायश्चित्तोपवासस्त्ययनप्रणिपातगमानाद्।[११]

चरके ज्वरचिकित्सिते 'विष्णुं सहस्त्रमूर्धानं चराचरपतिं विभुम्, स्तुवन्नामसहस्त्रेण ज्वरान् सर्वानपोहति' इत्यनेन ज्वरस्य दैवव्यपाश्रया चिकित्साऽभिहिताऽस्ति। अत्र 'स्तुवन्नामसहस्त्रेण' इत्यनेन महाभारतोक्तं विष्णुसहस्रानामस्तोत्रमेवाभिप्रेतम्।

चरकसंहितायाः निदानस्थानस्य ज्वरनिदाने अष्टज्वराः समुपस्थाप्यन्ते। यथा- वातजः, पित्तजः, कफजः, वात-पित्तजः, वात-कफजः, पित्तकफजः, वात-पित्तकफजः, आगन्तुजश्चेति। तदुक्तं चरकसंहितायाम्-

अथ खल्वष्टाभ्यः कारणेभ्यो ज्वरः सञ्जायते
मनुष्याणां तद्यथा-वातात्, पित्तात्, कफात्
वातपित्ताभ्यां वातकफाभ्यां पित्तकफाभ्यां
वातपित्तकफेभ्यः आगन्तोरष्टमात् कारणात्।[१२]

**वायुः** पित्तं कफश्चेति त्रिदोषमेव रोगोत्पत्तेः कारणम्- 'वायुः पित्तं कफश्चोक्तः शारीरो दोषसङ्ग्रहः॥'[१३]। यदा एतेषां वात-पित्त-कफादीनां भारसाम्यता वर्तते तदा शरीरं रोगरहितं भवति, परन्तु यदा एतेषु दोषत्रयेषु एकस्य द्वयोर्वा क्षयः वृद्धिर्वा भवति तदा कोऽपि जनः रोगेण पीडितो भवति[१४]। अकुपितावस्थायां स्थिताः एते शरीरं धारयन्ति तथा प्रकुपिताः सन्तः एते शरीरस्य अपकारकत्वेन वर्तन्ते[१५]। उपर्युक्तविश्लेषणादेतद् ज्ञायते यत् यद्यपि वातपित्तकफैः विना मानवदेहस्य कल्पना न सम्भवति ज्वरचिकित्सायां वातादिदोषत्रयस्य गुरुत्वपूर्णा भूमिका अस्ति।[१६] चरकसंहितायां समुपस्थापितेषु ज्वरभेदेषु केचन अत्र आलोच्यन्ते-

**वातज्वरः** यदा आमाशयात् पक्तिस्थानात् वा रसस्वेदवहस्त्रोतं पिधाय शरीरस्थतापं बर्हिनिरस्य शरीरमनुप्रपद्यते तदा वातज्वरो भवति। आमाशयस्य (पाचनस्थानस्य) परिधिविषये चरकसंहितायाः विमानस्थाने प्राप्यते यत् मनुष्याणां नाभिस्तनयोः मध्यभाग एव आमाशय इति कथ्यते (नाभिस्तनान्तरं जन्तोरामाशय इति स्मृतः। अशितं खादितं पीतं लीढं चात्र विपच्यते॥[१७] वातज्वरस्य लक्षणानि भवन्ति- अनियमितज्वरः, ऊष्मणो वैषम्यम्, पादयोः सुप्तता, मुखतालुकण्ठशोषः, पिपासा, शुष्कच्छर्दिः, शुष्ककासः, भ्रमप्रलापादि।[१८] रुक्षता, वमनादिनामतियोगः, वेगधावनादाघातादीनि अस्य कारणानि सन्ति। वातः वायुर्वा पित्तकफादिमलपदार्थान् एकस्थानतः अन्यस्थानं प्रति नयति। यत् तत्वं शरीरे गतेरुत्साहयोर्वा उत्पन्नं करोति तत् तत्वं वायुः वातः वा कथ्यते। अस्य विकृतिवशात् रोगाः उत्पद्यन्ते, मृत्युपर्यन्तं भवितुमर्हति-

सर्वा दि चेष्टा वातेन स प्राणः प्राणिनां स्मृतः।
तेनैव रोगा जायन्ते तेन चैवोपरुध्यते।[१९]

**वायुः** रजोगुणमय-सूक्ष्म-शीत-चञ्चलगुणवान् भवति। एते वायवः समगुणसम्पन्नानां पदार्थानां सेवनेन वृद्धिं लभन्ते तथा विपरीतगुणसम्पन्नानां पदार्थानां सेवनेन क्षयं लभन्ते-

चास्य कुपिताकुपितस्य शरीराशरीरचरस्य शरीरेषु।
चरतः कर्माणि बहिः शरीरेभ्यो वेति॥[२०]

**पित्तज्वरः** आहारपाक-धातुपाक-मलपाकादिकार्याणां मूलहेतुत्वेन स्थितं देहाग्नितत्वमेव पित्तरूपेण ज्ञायते। वाग्भटमतानुसारं कटु-अम्ल-उष्ण-लवणसेवनेन, क्रोधान्विताचरणेन भोजनपरिपाकसमये च पित्तं प्रकुपितं भवति[२१]। यदा कुपितपित्त आहाररसेन सह खेदवहस्त्रोतमवरुद्ध्य जाठराग्निं बर्हिष्कृत्य ज्वरं कारयति तत्तु पित्तज्वरः। चरकसंहितायामस्ति-

तद्यदा प्रकुपितमामाशयादूष्माणमुपसृज्याद्यमाहार
परिणामधातुं रसनामानमन्ववेत्य रसखेदवहानि
स्त्रोतांसि पिधाय द्रवत्वादग्निमुपहत्य पक्तिस्थाना-
दूष्माणं बर्हिर्निरस्य प्रपीडयत् केवलं
शरीरमनुप्रपद्यते तदा ज्वरमभिनिर्वर्तयति॥[२२]

अस्य पित्तज्वरस्य लक्षणानि यथा- युगपदेव सम्पूर्णे शरीरे तापवृद्धिः, मुखे कटुस्वादः, नखमुखतालुपाकः, तृष्णा, भोजनं प्रति द्वेषः, रक्तकोष्ठाभिनिर्वृत्तिः, अतिमात्रं दाहः। पित्तवर्धकपदार्थाः अस्य ज्वरस्य कृते हानिकारकाः भवन्ति तथा पित्तनाशकद्रव्याणि अस्य कृते हितकराणि भवन्ति। उष्ण-अम्ल-लवण-क्षार-अजीर्णभोज्य-विषमाहारसेवनादीनि अस्य कारणानि भवितुं शक्यन्ते।[२३]

**कफज्वरः** श्वेत-गुरु-स्निग्ध-पिच्छिल-शीतल-स्वादु-लवणगुणान्वितो भवति कफः। भारसाम्यावस्थायाम् एषः मधुरगुणयुक्तः वैषम्यावस्थायां च एषः लवणगुणयुक्तो भवति।[२४] प्रकुपितामाशयः कफरसेन सह स्वेदावरोधं कृत्वा तापं बहिर्निरस्य ज्वरोत्पन्नं करोति। तदुक्तं चरकसंहितायाम्-

स यदा प्रकुपितः प्रविश्यामाशयमूष्मणा सह
मिश्रीभूयाद्यमाहारपरिणामधातुं रसनामानमन्ववेत्य
रसस्वेदवहानि स्त्रोतांसि पिधायाग्निमुपहत्य।[२५]

युगपदेव सम्पूर्णशरीरे तापस्याभ्यागमनमभिवृद्धिर्वा-हल्लास-कम्पन-तन्द्रा-कास-श्वास- नयनवदन-मूत्रश्वेतवर्णादीनि अस्य कफज्वरस्य लिङ्गानि भवन्ति।[२६] घृतमिश्रितद्रव्यानां सेवनम्, परिश्रमविहीना जीवनशैली, अम्लजातीयद्रव्याणां सेवनं चेत्यादीनि अस्य कारणानि। विगतकाले 'कोरोना' इत्यभिधेयः महाव्याधिः समग्रविश्वे त्रासस्य सृष्टिं कृत्वा सहस्त्रजनानां प्राणान् हरति, तस्य लक्षणं कफज्वरस्य लक्षणेन सह मिलति एव इति चिकित्सकाः वदन्ति।

अस्माकं शरीरे ये खलु अपरिमितवातपित्तकफादयः वर्तन्ते ते सर्वे विभिन्नरोगान् उत्पादयन्ति। सूर्यस्य रश्मयः, जलधारा, विद्युत्, अग्नि एते सर्वे मिलित्वा रोगोत्पादकान् एतान् विनाशयन्ति। तदुक्तम् अथर्ववेदे-

**ओ ते द्यावापृथिवी ओता देवी सरस्वती।**
**ओतौ म इन्द्रश्चाग्निश्च जम्भयतामिति।।[२७]**

अष्टज्वरेषु वातपित्तज-वातकफज-पित्तकफज इति एतत् ज्वरत्रयं परस्परदोषद्वययुक्तत्वात् द्वन्द्वजज्वररूपेण तथा वातपित्तकफजज्वरः त्रिदोषसमन्वयात् सन्निपातज्वर इति नाम्ना ज्ञायते। कस्यचित् जनस्य चरित्रगतदोषस्य कृते, धर्मविरुद्धाचरणस्य कृते, ज्ञाताज्ञातापराधानां कृते प्रायश्चित्तविधानपरकाः नैकाः मन्त्राः अथर्ववेदे प्राप्यन्ते। सन्निपातज्वरः दैवापद्रूपेण स्वीकृतोऽस्ति। अतः तस्य उपचार असाधारणविधिना क्रियते। प्राचीनकाले वातपित्तादिदोषानुसारेण ज्वररोगनिर्णयमभवत्। सन्निपातज्वरे सर्वदोषाणां लक्षणम् प्रकटितं भवति। ज्वरोऽयं पुनः पुनः भूत्वा अकस्मादेव विनाशो भवति। नासिकायामार्द्रत्वम्, श्वासस्य दुर्गन्धिमयत्वमेव अस्मात् ज्वरात् समुद्भूतं भवति।

आगन्तुजज्वरः - अभिघातो लगुडाद्यभिघातः, अभिषङ्गः कामाद्यभिषङ्गः, अभिचारोऽथर्वमन्त्रादिर्ज्वरकरः, अभिशापस्तु गुरुसिद्धाद्यभिशपनम्, एतत् प्रधानत्वेन चतुर्विधं कारणं आगन्तुजज्वरस्य। आगन्तुज-ज्वरः सप्तविधज्वराद् भिन्नलक्षणत्वात् निदानत्वात् च विशिष्टरूपेण स्वीकृतोऽस्ति।

ज्वरस्य पूर्वरूपावस्थायां चिकित्सा कथं स्यात् ज्वरनिदानस्य अन्ते आलोच्यते। अयं ऋतु-अहोरात्र-भोजनकालादिषु निर्भरशीलो भवति। तदर्थं लघु-आहार-उपवास-स्नेहन-स्वेदन-प्रदेह-अनुलेपनादीनां प्रयोगः कर्तव्यः। दोषानुसारम् उपशमनम्, औषधादिग्रहणं करणीयञ्च। प्रसंगेऽस्मिन् चरकसंहितायाम् उक्तमस्ति यत् जीर्णज्वरे घृतपानप्रशस्तं भवति- जीर्णज्वरेषु तु सर्वेष्वेव सर्पिषः पानं प्रशस्यते।[२८]

ज्वरनिदानात् एतत् ज्ञायते यत् उत्तमस्य आहारस्य सेवनेन शारीरिकपरिश्रममाध्यमेन च मनुष्यस्य स्वास्थ्यं सुरक्षितं भवति। यदि तस्य व्यतिक्रमो भवति तर्हि मनुष्यः अस्वस्थ्यः भविष्यति। आहारेण न केवलं दैहिकस्वास्थ्यं मानसिक-स्वास्थ्यमपि सुरक्षितं भवति। मानवजीवने सुषमखाद्यस्य महत्वं छान्दोग्योपनिषदि समुद्घोषितम्-

आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ।

ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रंथीनां विप्रमोक्षाः।[२९]

श्रीमद्भगवद्गीतायां मानवानां सात्विक-राजसिक-तामसिकप्रवृत्यानुसारं आहारस्यापि वैविध्यं समुपस्थापितम्।[३०] आहारवत् न किमपि भेषजमस्ति इति काश्यपसंहितायां प्राप्यते-

न चाहारसमं किञ्चितभैषज्यमुपलभ्यते।

शक्यते अन्नमात्रेण नरः कर्तुं निरामयः॥[३१]

अतः सर्वदा सुषमाहारग्रहणं करणीयम्। अपि च शारीरिकपरिश्रमोऽपि रोगनिरामयस्य अन्यतमकारकत्वेन विविच्यते। मानवानां कृते कर्म एव गुरु अथवा ईश्वरः। ज्वरस्योपशमनाय वैद्यविहितसुषमखाद्यस्य उपादेयत्वं गरूडपुराणे उक्तमस्ति-

ज्वारः कलाम दीर्घमापयत्र बरतते।

कृष्णम व्याधियुक्तानं मिथ्याहारदीसेविनम्॥[३२]

श्रमविमुखता हि अपसंस्कृतिः। परिश्रमस्य गुरुत्वं ऋग्वेदे घोषितम्- ''न ऋते श्रान्तस्य सखाय देवाः''[३३] अर्थात परिश्रममाध्यमेन देवतायाः सानुग्रहं लब्धुं शक्यते। आङ्गलभाषायामस्ति - God helps those who help themselves. चरकसंहितायाः ज्वरनिदाने तादृशी धारणा एव प्रतिफलिता भवति।

प्राचीनकालादेव भारतदेशोऽयं विविधज्ञानाहरणे निरतो वर्तते। वैदिककालादेव भारते आध्यात्मिक-दार्शनिक-राजनैतिक-सामाजिकक्षेत्राणां चिन्तनेन सह चिकित्साविज्ञानविषयकचिन्तनमपि प्राचीनभारतीयविज्ञानिना कृतमासीत्। तत्र औषधिचिकित्सा-शल्यचिकित्सा-मनोवैज्ञानिकचिकित्सा-प्राकृतिकचिकित्सादीनां समुल्लेखः वेदादिशास्त्रेषु उपलभ्यते। परवर्तिकाले चरकसंहिता-सुश्रुतसंहिता-अष्टांगहृदय-भावप्रकाशादयः आयुर्वेदग्रन्थाः रचिता अभवन्। भारतेतरदेशे यदा ज्ञानस्य प्रकाशोऽपि नासीत् तदानीमेव भारते समाजजीवनस्य सुपरिचालनार्थं भारतीयमनिषिभिः नैकानां विद्यानां चर्चा

विहिता। चिकित्साविज्ञानक्षेत्रे भारतीयानां योगदानं प्रशस्यतरं वर्तते। आधुनिकचिकित्साविज्ञानं साम्प्रतिककालेऽपि चिकित्साविषयकविविधरोगाणाम् औषधानामुपरि शोधं कुर्वत् अस्ति। किन्तु प्राचीनभारतवर्षे चरकसंहितादिग्रन्थेषु आयुर्वेदिकपद्धतिना चिकित्साविधानस्य पराकाष्ठा प्रदर्शिता आसीत्। तदानीम् अनया आयुर्वेदिकपद्धतिना जनाः सुदीर्घकालं यावत् जीवनं यापयन्ति स्म। परन्तु आधुनिकचिकित्साविधिना तां चिकित्सां दातुं समर्थो न दृश्यते। यतो हि कालान्तरं पुनः स एव रोगः शरीरे परिदृश्यते। किन्तु प्राचीनभारतीय-आयुर्वेदिकविधिना चिकित्सा क्रियते चेत् रोगः समूलं अपगच्छति एव। चरकसंहितायां निरूपिताः ज्वरादिबहवः विषया इदानीम् आधुनिकचिकित्साविज्ञाने निरूप्यमाणाः दृश्यन्ते। तस्मादेव आधुनिकवैज्ञानिकाः प्राचीनभारतीय-आयुर्वेदिकचिक्तिसाविधानस्योपरि विविधशोधादिकार्यं कुर्वन्तः सन्ति। साम्प्रतिकसमये भारतसर्वकारेणापि आयुर्वेदिकचिकित्सापद्धत्याः उपादेयत्वम् अग्रे संस्थाप्य 'आयुष' इति स्वतन्त्रः मन्त्रालयः कृतोऽस्ति। तदर्थं देशस्य विविधप्रान्तेषु आयुर्वेदिकमहाविद्यालयाः आयुर्वेदिकशोधसंस्थानानि च प्रतिष्ठाप्य अध्ययन-अध्यापनगवेषणादिकार्यं सञ्चालयति। साम्प्रतिककाले तु वैदेशिकाः चिकित्साविज्ञानिनोऽपि भारतीय-आयुर्वेदिकज्ञानधारणां प्रति आकृष्टाः दृश्यन्ते। चरकसंहितायां प्रतिपादितज्वररोगस्य विज्ञानसम्मतं परीक्षणं कृत्वा प्रयोगः क्रियते चेत् प्राचीनार्वाचीनविधीनां संयोगेन तद्विषये नवाः सम्भावना आविर्भवितुमर्हन्ति। अतः आधुनिकयुगेऽपि प्राचीनभारतीयचिकित्साविज्ञानस्य प्रासङ्गिकता अस्ति। प्राचीनभारतीयायुर्वेदग्रन्थानां सूक्ष्मातिसूक्ष्माध्ययनेन आधुनिकचिकित्साविज्ञानम् इतोऽपि सबलं कर्तुं शक्यते इति।

**सन्दर्भा :**


१. चरकसंहिता (च.सं.), विमानस्थानम्, ८.३

२. च.सं., चिकित्सास्थानम्, ३/१२

३. च.सं., निदानस्थानम्, प्रथमोऽध्यायः, १-२

४. उक्तग्रन्थः, १६

५. उक्तग्रन्थः, पृ.४८६

६. हरिवंश, १/६४

७. अथर्ववेदः, ५/४/१

८. उक्तग्रन्थः, १०/३/६

९. च.सं,, सूत्रस्थानम्, १/५८

१०. उक्तग्रन्थः, ११/५४

११. उक्तग्रन्थः, ११/५४

१२. च.सं, निदानस्थानम, प्रथमोऽध्यायः, १७

१३. च.सं., सूत्रस्थानम, १/५७

१४. उक्तग्रन्थः, ९/४

१५. सुश्रुतसंहिता (सु.सं), सूत्रस्थानम्, २७/१७

१६. उक्तग्रन्थः, सूत्रस्थानम्, २१/४

१७. च.सं, विमानस्थानम्, २/१७

१८. तस्येमानि लिङ्गानि भवन्ति ..... उष्मणो वैषम्यम्, तीव्रतनुभावानवस्थानानि ज्वरस्य, .... पादयोः सुप्तता, पिण्डिकयोरुद्वेष्टनम्, जानुनोः केवलानां च सन्धीनां विश्लेषणम्, ऊर्वोः साद ...... च.सं., निदानस्थानम्, २/२१

१९. च.सं, सूत्रस्थानम्, ११८

२०. उक्तग्रन्थः,१२/३
२१. अष्टाङ्गहृदयम्, निदानस्थानम्, २/१६
२२. च.सं., निदानस्थानम्, २३
२३. उक्तग्रन्थः, २२
२४. सु.सं., सूत्रस्थानम्,२९/९५
२५. च.सं., निदानस्थानम्, प्रथमोऽध्यायः, २६
२६. उक्तग्रन्थः, प्रथमोऽध्यायः, २७
२७. अ.वे,. ५/५/२/१
२८. च.सं., प्रथमोऽध्यायः, ३७
२९. छा.उ., ६/२६/२/१
३०. श्रीमद्भगवद्गीता, ६/१६
३१. काश्यपसंहिता, ४/६
३२. गरूडपुराणम्, ३/१/९
३३. ऋग्वेदः, ४/१३/११

**ग्रन्थसूची :**

१. अष्टांगहृदयम्, अनुवादकः - के.आर.श्रीकण्ठमुर्ती, २०२०, चौखम्बा कृष्णदास अकाडेमी, वाराणसी।
२. चरकसंहिता, सम्पादकः - डा० ब्रह्मानन्द त्रिपाठी, २०२१, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
३. सुश्रुतसंहिता, अनुवादकः - हिमसागर चन्द्र मुत्ति, २०२१, चौखम्बा संस्कृत चिरिज अफिच, वाराणसी।
४. हरिवंश, सम्पादकः - रामनारायण दत्त शास्त्री पाण्डेय, शकाब्द २०४५, गीताप्रेच, गोरखपुर।

❑❑○❑❑